योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२७

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

तस्मिन् गिरितटे ग्रामे तस्य मण्डपकोटरे ।

अन्तर्धिमाश्वाययतुस्तत्रस्थे एव ते स्त्रियौ ।। १

अस्माकं वनदेवीभ्यां प्रसादः कृत इत्यथ ।

शान्तदुःखे गृहजने स्वव्यापारपरे स्थिते ।। २

मण्डपाकाशसंलीनां लीलामाह सरस्वती ।

व्योमरूपा व्योमरूपां स्मयात्तूष्णीमिव स्थिताम् ।। ३

संकल्पस्वप्नयोर्येषां यत्र संकथनं मिथः ।

यथेहार्थक्रियां धत्ते तयोः सा संकथा तथा ।। ४

पृथ्व्यादिनाडीप्राणादिरूतेऽप्यभ्युदिता तयोः ।

सा संकथनसंवित्तिः स्वप्नसंकल्पयोरिव ।। ५

श्रीसरस्वत्युवाच ।

ज्ञेयं ज्ञातमशेषेण दृष्टादृष्टार्थसंविदः ।

ईदृशीयं ब्रह्मसत्ता किमन्यद्वद पृच्छसि ।। ६

लीलोवाच ।

मृतस्य भर्तुर्जीवोऽसौ यत्र राज्यं करोति मे ।

तत्राहं किं न तद्दृष्टा दृष्टास्मीह सुतेन किम् ।। ७

श्रीसरस्वत्युवाच ।

अभ्यासेन विना वत्से तदा ते द्वैतनिश्चयः ।

नूनमस्तंगतो नाभून्निःशेषं वरवर्णिनि ।। ८

अद्वैतं यो न यातोऽसौ कथमद्वैतकर्मभिः ।
युज्यते तापसंस्थस्य च्छायाङ्गानुभवः कुतः ।। ९
लीलास्मीति विनाभ्यासं तव नास्तगतोऽभवत् ।
यदा भावस्तदा सत्यसंकल्पत्वमभून्न ते ।। १०
अद्यासि सत्यसंकल्पा संपन्ना तेन मां सुतः ।
सपश्यत्वित्यभिमतं फलितं तव सुन्दरि ।। ११
इदानीं तस्य भर्तुस्त्वं समीपं यदि गच्छसि ।
तत्तेन व्यवहारस्ते पूर्ववत्संप्रवर्तते ।। १२
लीलोवाच ।
इहैव मन्दिराकाशे पतिर्विप्रो ममाभवत् ।
इहैव स मृतो भूत्वा संपन्नो वसुधाधिपः ।। १३
इहैव तस्य संसारे तस्मिन्भूमण्डलान्तरे ।
राजधानीपुरे तस्मिन्पुरन्ध्र्यस्मि व्यवस्थिता ।। १४
इहैवान्तःपुरे तस्मिन्स मृतो मम भूपतिः ।
इहैवान्तःपुराकाशे तस्मिन्नेव पुरे नृपः ।। १५
संपन्नो वसुधापीठे नानाजनपदेश्वरः ।
सर्वार्जवजवीभाव इहैवैवं व्यवस्थितः ।। १६
अस्मिन्नेव गृहाकाशे सर्वा ब्रह्माण्डभूमयः ।
स्थिताः समुद्गके मन्ये यथान्तः सर्षपोत्कराः ।। १७
सदाऽदूरमहं मन्ये तद्भर्तुर्मम मण्डलम् ।
क्वचित्पार्श्वे स्थितमिह यथा पश्यामि तत्कुरु ।। १८
श्रीदेव्युवाच ।
भूतलारुन्धतिसुते भर्तारस्तव संप्रति ।
त्रयो नामाथवाभूवन्बहवः शतसंमताः ।। १९
नेदीयसां त्रयाणां तु द्विजस्ते भस्मतां गतः ।
राजा माल्यान्तरगतः संस्थितोऽन्तःपुरे शवः ।। २०

संसारमण्डले ह्यस्मिंस्तृतीयो वसुधाधिपः ।

महासंसारजलधिं पतितो भ्रममागतः ।। २१

भोगकल्लोलकलनाविकलो मलचेतनः ।

जाड्यजर्जरचिद्वृत्तिः संसाराम्भोधिकच्छपः ।। २२

चित्राणि राजकार्याणि कुर्वन्नप्याकुलान्यपि ।

सुप्तः स्थितो जडतया न जागर्ति भवभ्रमे ।। २३

ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ।

इत्यनर्थमहारज्वा वलितो वशतां गतः ।। २४

तत्कस्य वद भर्तुस्त्वां समीपं वरवर्णिनि ।

वात्या वनान्तरं गन्धलेखामिव वनान्नये ।। २५

अन्य एव हि संसारः सोऽन्यो ब्रह्माण्डमण्डपः ।

अन्या एव तता वत्से व्यवहारपरम्पराः ।। २६

संसारमण्डलानीह तानि पार्श्वे स्थितान्यपि ।

दूरं योजनकोटीनां कोटयस्तेष्विहान्तरम् ।। २७

आकाशमात्रमेतेषामिदं पश्य वपुः पुनः ।

मेरुमन्दरकोटीनां कोटयस्तेष्ववस्थिताः ।। २८

परमाणौ परमाणौ सर्ववर्गानिरर्गलम् ।

महाचितेः स्फुरन्त्यर्करुचीव त्रसरेणवः ।। २९

महारम्भगुरूण्येवमपि ब्रह्माण्डकानि हि ।

तुलया धानकामात्रमपि तानि भवन्ति नो ।। ३०

नानारत्नामलोद्द्योतो वनवद्भाति खे यथा ।

पृथ्व्यादिभूतरहिता जगच्चिद्भाति चिन्तया ।। ३१,

कचति ज्ञप्तिरेवेदं जगदित्यादि नात्मनि ।

नतु पृथ्व्यादि संपन्नं सर्गादावेव किंचन ।। ३२

यथा तरङ्गः सरसि भूत्वा भूत्वा पुनर्भवेत् ।

विचित्राकारकालाङ्गदेशाज्ञप्तावलं तथा ।। ३३

लीलोवाच ।

एवमेतज्जगन्मातर्मया स्मृतमिहाधुना ।

ममेदं राजसं जन्म न तमो न च सात्त्विकम् ।। ३४

ब्रह्मणस्त्ववतीर्णाया अष्टौ जन्मशतानि मे ।

नानायोनीन्यतीतानि पश्यामीवाधुना पुनः ।। ३५

संसारमण्डले देवि कस्मिंश्चिदभवं पुरा ।

लोकान्तराब्जभ्रमरी विद्याधरवराङ्गना ।। ३६

दुर्वासनाकलुषिता ततोऽहं मानुषी स्थिता ।

संसारमण्डलेऽन्यस्मिन्पन्नगेश्वरकामिनी ।। ३७

कदम्बकुन्दजम्बीरकरञ्जवनवासिनी ।

पत्राम्बरधरा श्यामा शबर्यहमथाभवम् ।। ३८

वनवासनया मुग्धा संपन्नाहमथोद्धता ।

गुलुच्छनयना पत्रहस्ता वनविलासिनी ।। ३९

पुण्याश्रमलता साहं मुनिसङ्गपवित्रिता ।

वनाग्निदग्धा तस्यैव कन्याभूवं महामुनेः ।। ४०

अस्त्रीत्वफलदातॄणां कर्मणां परिणामतः ।

राजाहमभवं श्रीमान्सुराष्ट्रेषु समाः शतम् ।। ४१

तालीनां तलकच्छेषु राजदुष्कृतदोषतः ।

नकुली नववर्षाणि कुष्ठनष्टाङ्गिकाभवम् ।। ४२

वर्षाण्यष्टौ सुराष्ट्रेषु देवि गोत्वं कृतं मया ।

मोहाद्दुर्जनदुष्टाज्ञबालगोपाललीलया ।। ४३

विहंग्या वैरविन्यस्ता वागुरा विपिनावनौ ।

क्लेशेन महता च्छिन्ना अधमा वासना इव ।। ४४

कर्णिकाक्रोडशय्यासु विश्रान्तमलिना सह ।

पद्मकुड्मलकोशेषु भुक्तकिंजल्कया रहः ।। ४५

भ्रान्तमुत्तुङ्गशृङ्गासु हरिण्या हारिनेत्रया ।

वनस्थलीषु रम्यासु किराताहतमर्मया ।। ४६

दृष्टं नष्टासु दिक्ष्वब्धिकल्लोलैरुह्यमानया ।

मत्स्याम्बुकच्छपाच्छोडे मोघमाननताडनम् ।। ४७

पीतं चर्मण्वतीतीरे गायन्त्या मधुरस्वरम् ।

पुलिन्द्या सुरतान्तेषु नालिकेररसासवम् ।। ४८

सारसीसरसालिन्या सीत्कारमधुरस्वरम् ।

सारसः सुरतैः स्वैरं सामन्तश्चारुरञ्जितः ।। ४९

तालीतमालकुञ्जेषु तरलाननेत्रया ।

क्षीबप्रेक्षणविक्षोभैः कृतं कान्तावलोकनम् ।। ५०

कनकस्यन्दसंदोहसुन्दरैरङ्गपञ्जरैः ।

स्वर्गेऽप्सरोम्बुजिन्याशु तोषिताः सुरषट्पदाः ।। ५१

मणिकाञ्चनमाणिक्यमुक्तानिकरभूतले ।

कल्पद्रुमवने मेरौ यूना सह रतं कृतम् ।। ५२

कल्लोलाकुलकच्छासु लसद्गुच्छलतासु च ।

वेलावनगुहास्वब्धेश्चिरं कूर्मतया स्थितम् ।। ५३

तरत्तारतरङ्गासु दोलनं सरसालिनाम् ।

चलच्छदपटालीषु राजहंस्यं मया कृतम् ।। ५४

शाल्मलीदललोलानामान्दोलनदरिद्रताम् ।

मशकस्य मयालोक्य दीनं मशकया स्मितम् ।। ५५

तरत्तारतरङ्गासु चञ्चद्वीच्यग्रचुम्बनैः ।

भ्रान्तं शैलस्रवन्तीषु जलवञ्जुललीलया ।। ५६

गन्धमादनमन्दारमन्दिरे मदनातुरा ।

पातिताः पादयोः पूर्वं विद्याधरकुमारकाः ।। ५७

कर्णिकर्पूरपूरेषु तल्पेषु व्यसनातुरा ।

चिरं विलुलितास्मीन्दुबिम्बेष्विव शशिप्रभा ।। ५८

योनिष्वनेकविधदुःखशतान्वितासु भ्रान्तं मयोन्नमनसन्नमनाकुलात्मा ।

संसारदीर्घसरितश्चलया लहर्या दुर्वारवातहरिणीसरणक्रमेण ।। ५९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे जन्मान्तरवर्णनं नाम सप्तविंशः सर्गः ।। २७ ।।